नृपजोऽन्यैः शुभम्। समनुपतिता यस्मिन् भागे त्रयः सबुधा यदा भवति नियमात्तस्यावाप्तिः शुभेष्वशुभेषु वा। व्रणकृदशुभः षष्ठे देहे तनोर्भसमाश्रिते तिलकमशकृद्दृष्टः सौम्यैर्युतश्च स लक्ष्मवान्” ९अ० अष्टवर्गफलमुक्तं तच्चाष्टवर्गशब्दे ५२०पृ०दर्शितम्। नाभसादियोगास्तच्छब्दे वक्ष्यन्ते।

तत्रोनविंशोरिष्टाध्यायो यथा

“लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथ वाऽऽलोकिते चन्द्राद्वा यदि सम्पदस्ति हितयोर्ज्ञेयोऽन्यथासम्भवः। पाथेनोदयगे रवौ रविसुतो मीनस्थितोदारहा पुत्रस्थानगतश्च पुत्रमरणं पुत्रोऽवनेर्यच्छति। उग्रग्रहैः सितचतुरस्रसंस्थितैर्मध्यस्थिते भृगुतनयेऽथवोग्रयोः। सौम्यग्रहैरसहितसंनिरीक्षिते जायावधोदहननिपातपाशजः। लग्नाद्व्ययारिगतयोः शशितिग्मरश्म्योः पत्न्या सहैकनयनस्य वदन्ति जन्म। द्यूनस्थयोर्नवमपञ्चमसंस्थयोर्वा शुक्रार्कयोर्विकलदारमुशन्ति जातम्। कोणोदये भृगुतनयेऽस्तचक्रसन्धौ बन्ध्यापतिर्यदि न सुतर्क्षमिष्टयुक्तम्। पापग्रहैर्व्ययमदलग्नराशिसंस्थैः क्षीणे शशिन्यसुतकलत्रजन्मधीस्थे। असितकुजयोर्वर्गेऽस्तस्थे सिते तदवेक्षिते परयुवतिगस्तौ चेत् सेन्दू स्त्रिया सह पुंश्चलः। भृगुजशशिनोरस्तेऽभार्य्यो नरोविसुतोऽपि वा परिणततनून्नस्त्रोर्दृष्टौ शुभैः प्रमदापती। वंशच्छेत्ता खमदसुखगैश्चन्द्रदैत्येज्यपापैः शिल्पी त्र्यंशे शशिसुतयुते केन्द्रसंस्थार्किदृष्टे। दास्यां जातोदितिसुतगुरौ रिप्फगे सौरभागे नीचेऽर्केन्द्वोर्मदनगतयोर्दृष्टयोः सूर्य्यजेन। पापाऽऽलोकितयोः सितावनिजयोरस्तस्थयोर्वाध्वरुक्चन्द्रे कर्कटवृश्चिकांशकगते पापैर्युते गुह्यरुक्। श्वित्री रिप्फधनस्थयोरशुभयोश्चन्द्रोदयेऽस्ते रवौ चन्द्रे खेऽवनिजेऽष्टगे च विकलो यद्यार्कजोवैशिगः। अन्तःशशिन्यशुभयोर्मृगगे पतङ्गे श्वासक्षयप्लिहकविद्रधिगुल्मभाजः। शोफीपरस्परगृहांशगयोरवीन्द्वोः क्षेत्रेऽथवा युगपदेकगयोः कृशो वा। चन्द्रेऽश्विमध्यभृत्प्रकर्किमृगाजभागे कुष्ठी समन्दरुधिरे तदवेक्षिते वा। यातैस्त्रिकोणमलिकर्किवृषैर्मृगे च कुष्ठी च पापसहितैरवलोकितैर्वा। निधनारिधनव्ययस्थिता रविचन्द्रारयमा यथा तथा। बलवद्ग्रहदोषकारणैर्मनुजानां जनयन्त्यनेत्रताम्। नवमायतृतीयधीयुता न च सौम्यैरशुभा निरीक्षिताः। नियमाच्छ्रवणोपघातदा रदवैकृत्यकराश्च सप्तमे। उदयत्युडुपे सुरास्यगे सपिशाचोऽशुभयोस्त्रिकोणयोः। तमसोपप्लवमण्डले रवावुदयस्थे नयनोपवर्जितः। संसृष्टः पवनेन मन्दगयुते द्यूने विलग्ने हरौ सोन्मादोऽवनिजे स्थितेऽस्तभवने जीवे विलग्नाश्रिते। तद्वत्सूर्य्यसुतोदयेऽवनिसुते धर्मात्मजद्यूनगे जाते वा ससहस्ररश्मितनये क्षीणे व्यये शीतगौ। राश्यंशपोष्णकरशीतकरामरेज्यैर्नीचाधिपांशकगतैररिभावगैर्वा। एभ्योऽल्पमध्यबहुभिः क्रमशः प्रसूताज्ञेयाःस्युरभ्युपगमक्रयगर्भदासाः। विकृतदशनः पापैर्दृष्टे वृषाजहयोदये खलतिरशुभक्षेत्रे लग्ने हये वृषभेऽपि वा। नवमसुतगे पापैर्दृष्टे रवावदृढेक्षणो दिनकरसुतेऽनेकव्याधिः कुजे विकलः पुमान्। व्ययसुतधनधर्मगैरसौम्यैर्भवनसमाननिबन्धनं विकल्प्यम्। भुजगनिगडपाशभृद्दृक्काणैर्बलवदसौम्यनिरीक्षितैश्च तद्वत्। परुषवचनोऽपस्मारार्त्तः क्षयी च निशापतौ सरवितनये वक्रालोकं गते परिवेषगे। रवियमकुजैः सौम्यादृष्टैर्नभःस्थलमाश्रितैर्भृतकमनुजः पूर्वोद्दिष्टैर्वराधममध्यमाः।”

चान्द्रयोगास्तु १३अ० उक्ता यथा।

“अधमसमवरिष्ठान्यर्ककेन्द्रादिसंस्थे शशिनि विनयवित्तज्ञानधीनैपुणानि। अहनि निशि च चन्द्रे स्वाधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान् स्यात् सुखी च। सौम्यैः स्मरारिनिधनेष्वधियोग इन्दोस्तस्मिंश्चमूपसचिवक्षितिपालजन्मा सम्पन्नसौख्यविभवा हतशत्रवश्च दीर्घायुषो विगतरोगभयाश्च जाताः। हित्वार्कं सुनफाऽनफा दुरुधुराः स्वान्त्योभयस्थैर्ग्रहैः शीतांशोः कथितोऽन्यथा तु बहुभिः केमद्रुमोऽन्यैस्त्वसौ। केन्द्रे शीतकरेऽथवा ग्रहयुते केमद्रुमो नेष्यते केचित् केन्द्रनवांशकेषु च वदन्त्युक्तिः प्रसिद्धा न तु। त्रिंशत्सरूपाः सुनफाऽनफाख्याः षष्टित्रयन्दौरुधुरे प्रभेदाः। इच्छाविकल्पैः क्रमशोऽभिनीय नीते निवृत्तिः पुनरन्यनीतिः। स्वयमधिगतवित्तः पार्थिवस्तत्समो वा भवति हि सुनफायाम्धीधनख्यातिमांश्च। प्रभुरगदशरीरः शीलवान् ख्यातकीर्तिर्विषयसुखसुवेषो निर्वृतश्चानफायाम्। उत्पन्नभोगसुखभुग्धनवाहनाढ्यस्त्यागान्वितो दुरुधुराप्रभवः सुभृत्यः। केमद्रुमे मलिनदुःखितनीचनिःस्वाः प्रेष्याः खलाश्च नृपतेरपि वंशजाताः। उत्साहशौर्य्यधनसाहसवान् महीजः सौम्यः पटुः सुवचनो निपुणः कलासु। जीवोऽर्थधर्मसुखभुग् नृपपूजितश्च कामी भृगुर्बहुधनो विषयोपभोक्ता। परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्य्यकृद्गणेशः। अशुभकृदुडुपोऽह्नि दृश्यमूर्तिर्गलिततनुश्च शुभोऽन्यथान्यदूह्यम्।